## Parjanya Sūktam

[RV S 5-83 (1) & 7-102 (2) (Kāñchī Pāṭhaḥa)]

ॐ अच्छाँ वद तवसँ गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास ।

ॐ at'chhāā vada tavasaṅ'ṅ' gīr'bhirābhis'
stuhi par'jan'yan' namasā vi-vāsa ।

कनिक्रदद्वृषभो जीरदाँनू रेतोँ दधात्योषधीषु गर्भँम् ॥ १ ॥

kanik'radad'vṛṣhabhō jīradāānū rētōō
dadhāt'yōṣha-dhīṣhu gar'bham'm ॥ 1 ॥

वि वृक्षान्हनँत्युत हनँति रक्षसो विश्वँ बिभाय भुवनं महावधात् ।

vi vṛk'ṣhān'han'n'tyuta han'n'ti rak'ṣhasō
viśh'vam'm' bibhāya bhuva-nam' mahāva-dhā-te ।

उतानाँगा , ईषते वृष्ण्याँवतो यत्पर्जन्यः स्तनयन्हन्ति दुष्कृतः ॥ २ ॥

utānāāgā , īṣhatē vṛṣh'ṇyāāvatō yat'par'jan'yas'
stanayan'han'ti- duṣh'kṛta-ḥa ॥ 2 ॥

रथीव कशयाश्वाँ , अभिक्षिपन्नाविर्दूतान्कृणुते वर्ष्याँ३ अह ।

rathīva kaśhayāśh'vāām̐ , abhik'ṣhipan'nāvir'
dūtān'kṛ-ṇutē var'ṣhyāāāā , ām̐ , aha- ।

दूरात्सिंहस्य स्तनथा , उदीरते यत्पर्जन्यः कृणुते वर्ष्यँ१ नभः ॥ ३ ॥

dūrāt'siṁ'has'yas' stanathā , udīīratē
yat'par'jan'ya[hk]' kṛṇutē
var'ṣhyaaa , an' nabha-ḥa ॥ 3 ॥

www.SaiVeda.net

प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः ।
pra vātā vān'ti- patayan'n'ti vid'yuta ,
udōṣha-dhīr'jiha-tē pin'va-tēs' sva-ḥa ।

इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति ॥४॥
irā viśh'vas'mai bhuva-nāya jāyatē
yat'par'jan'ya[fp]' pṛthivīṁ' rētasāva-ti ॥ 4 ॥

यस्य व्रते पृथिवी नन्नमीति यस्य व्रते शफवज्जर्भुरीति ।
yas'yav' vratē pṛ-thivī nan'na-mīti yas'yav' vratē
śhaphavaj'jar'bhu-rīti ।

यस्य व्रत , ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥५॥
yas'yav' vrata , ōṣha-dhīr'viśh'varūūpās'
sa na[fp]' par'jan'ya mahi śhar'ma- yat'chha ॥ 5 ॥

दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो , अश्वस्य धाराः ।
divō nōō vṛṣh'ṭim' ma-rutō rarīdh'vam'
pra pin'n'vata vṛṣh'ṇō , aśh'vas'ya dhārāāḥa ।

अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥६॥
ar'vāṅētēnas' stanayit'nunēh'yapō
ni-ṣhiñ'chan'nasu-ra[fp]' pitā na-ḥa ॥ 6 ॥

अभि क्रन्द स्तनय गर्भमा धाः , उदन्वता परि दीया रथेन ।
abhik' kran'n'das' stanaya gar'bhamā dhāā ,
udan'vatā pari- dīyā rathēēna ।

दृतिं सु क॑र्॒ष विषि॑तं॒ न्य॑ञ्च॒ं समा भ॑वन्तू॒द्वतौ᳚ निपा॒दाः ॥७॥

dṛtiṁ’ su kaṛ’ṣha viṣhi-tan’ nyañ’ñ’chaṁ’ samā

bha-van’tūd’vatōō nipādā-ḥa ॥ 7 ॥

म॒हान्तं॒ कोश॒मुद॑चा॒ नि षि॑ञ्च॒ स्यन्द॑न्तां कु॒ल्या विषि॑ताः पु॒रस्ता᳚त् ।

mahān’taṅ’ kōśhamuda-chā ni ṣhiñ’ñ’chas’

syan’dan’n’tāṅ’ kul’yā viṣhi-tā[fp]’ puras’tāāte ।

घृ॒तेन॒ द्यावा᳚पृथि॒वी व्यु॑न्ध्॒धि सु॒प्रपा॒णं भ॑वत्व॒घ्न्याभ्य॑ः ॥८॥

ghṛtēnad’ dyāvāāpṛthivīv’ vyun’n’dhi sup’rapāṇam’

bha-vat’vagh’nyābh’ya-ḥa ॥ 8 ॥

यत्प॑र्जन्य॒ कनि॑क्रदत्स्त॒नय॒न्हंसि॑ दु॒ष्कृत॑ः ।

yat’par’jan’ya kanik’radat’

stanayan’haṁ’si- duṣh’kṛta-ḥa ।

प्रतीदं॒ विश्वं᳚ मोदते॒ यत्किं च॑ पृथि॒व्यामधि॑ ॥९॥

pratīdaṁ’ viśh’vam’m’ mōdatē

yat’kiñ’ cha- pṛthiv’yāmadhi- ॥ 9 ॥

अव॑र्॒षीर्व॒र्॒षमुदु॒ षू गृ॑भा॒याक॒र्धन्वा॒न्यत्यै᳚त॒वा , उं ।

avaṛ’ṣhīr’vaṛ’ṣhamudu ṣhū

gṛ-bhāyākar’dhan’vān’yat’yēētavā , u- ।

अजी᳚ज॒न , ओष॑धी॒र्भोज॑नाय॒ कमु॒त प्र॒जाभ्यो᳚ऽविदो मनी॒षाम् ॥१०॥

ajīījana , ōṣha-dhīr’bhōja-nāya kamutap’

prajābh’yōō (a)vidō manīṣhām ॥ 10 ॥ (1)

पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे । स नो यवसमिच्छतु ॥ १ ॥

par’jan’yāāyap’ pra gāāyata

divas’put’rāya- mīlhuṣhēē ।

sa nō yava-samit’chhatu ॥ 1 ॥

यो गर्भमोषधीनां गवाङ् कृणोत्यर्वताम् । पर्जन्यः पुरुषीणाम् ॥ २ ॥

yō gar’bhamōṣha-dhīnāṅ’ gavāāṅ’ kṛṇōt’yar’va-tām ।

par’jan’ya[fp]’ puruṣhīṇāām ॥ 2 ॥

तस्मा , इदास्ये हविर्जुहोता मधुमत्तमम् । इळान् नः संयतं करत् ॥ ३ ॥

tas’mā , idās’yēē havir’juhōtā madhu-mat’tamam ।

iḻāān’ nas’ sañ’yataṅ’ṅ’ karate ॥ 3 ॥ (2)

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.Sai Veda.net

[RV S 5-83 (1) & 7-102 (2) (Śhṛṅgērī Pāṭhaḥa)]

ॐ अच्छा॑ वद त॒वसं॑ गी॒र्भिरा॒भिः स्तु॒हि प॒र्जन्यं॒ नम॒सा वि॑वास ।

ॐ at'chhāā vada tavasaṅ'ṅ' gīr'bhirābhis'
stuhi par'jan'yan' namasā vivāsa ।

कनि॑क्रदद्वृष॒भो जी॒रदा॑नू॒ रेतो॑ दधा॒त्योष॑धीषु॒ गर्भ॑म् ॥ १ ॥

kanik'radad'vṛṣhabhō jīradāānū rētōō
dadhāt'yōṣhadhīṣhu gar'bham'm ॥ 1 ॥

वि वृ॒क्षान्ह॑न्त्यु॒त ह॑न्ति र॒क्षसो॒ विश्वं॑ बिभाय॒ भुव॑नं म॒हाव॑धात् ।

vi vṛk'ṣhān'han'n'tyuta han'n'ti rak'ṣhasō
viśh'vam'm' bibhāya bhuvanam' mahāvadhāte ।

उ॒ताना॑गा , ईषते॒ वृष्ण्या॑वतो॒ यत्प॒र्जन्यः॑ स्त॒नय॒न्हन्ति॑ दु॒ष्कृतः॑ ॥ २ ॥

utānāāgā , īṣhatē vṛṣh'ṇyāāvatō yat'par'jan'yas'
stanayan'han'ti duṣh'kṛta-ḥa ॥ 2 ॥

र॒थीव॒ कश॒याश्वाँ॑ , अभि॒क्षिप॑न्ना॒विर्दू॒तान्कृ॑णुते व॒र्ष्याँ३॒ अह॑ ।

rathīva kaśhayāśh'vāām̐ , abhik'ṣhipan'nāvir'
dūtān'kṛṇutē var'ṣhyāāāā , ām̐ , aha ।

दू॒रात्सिं॒हस्य॑ स्त॒नथा॑ , उदी॑रते॒ यत्प॒र्जन्यः॑ कृणु॒ते व॒र्ष्यं१॒ नभः॑ ॥ ३ ॥

dūrāt'siṁ'has'yas' stanathā , udīīratē
yat'par'jan'ya[hk]' kṛṇutē
var'ṣhyaaa , an' nabha-ḥa ॥ 3 ॥

www.SaiVeda.net

प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः ।

pra vātā vān’ti patayan’n’ti vid’yuta ,

udōṣhadhīr’jihatē pin’vatēs’ sva-ḥa ।

इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति ॥४॥

irā viśh’vas’mai bhuvanāya jāyatē

yat’par’jan’ya[fp]’ pṛthivīṁ’ rētasāvati ॥ 4 ॥

यस्य व्रते पृथिवी नन्नमीति यस्य व्रते शफवज्जर्भुरीति ।

yas’yav’v’ vratē pṛthivī nan’namīti yas’yav’v’ vratē

śhaphavaj’jar’bhurīti ।

यस्य व्रत , ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ ॥५॥

yas’yav’v’ vrata , ōṣhadhīr’viśh’varūūpās’

sa na[fp]’ par’jan’ya mahi śhar’ma yat’chha ॥ 5 ॥

दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो , अश्वस्य धाराः ।

divō nōō vṛṣh’ṭim’ marutō rarīdh’vam’

pra pin’n’vata vṛṣh’ṇō , aśh’vas’ya dhārāāḥa ।

अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥६॥

ar’vāṅētēnas’ stanayit’nunēh’yapō

niṣhiñ’chan’nasura[fp]’ pitā na-ḥa ॥ 6 ॥

अभि क्रन्द स्तनय गर्भमा धा , उदन्वता परि दीया रथेन ।

abhik’ kran’n’das’ stanaya gar’bhamā dhāā ,

udan’vatā pari dīyā rathēēna ।

दृतिं सु कर्ष विषितं न्यञ्चं समा भवन्तूद्वतौ निपादाः ॥७॥

dṛtiṁ’ su kar̥’ṣha viṣhitan’ nyañ’ñ’chaṁ’ samā
bhavan’tūd’vatōō nipādā-ḥa ‖ 7 ‖

महान्तं कोशमुदचा नि षिञ्च स्यन्दन्तां कुल्या विषिताः पुरस्तात् ।

mahān’taṅ’ kōśhamudachā ni ṣhiñ’ñ’chas’
syan’dan’n’tāṅ’ kul’yā viṣhitā[fp]’ puras’tāāte ।

घृतेन द्यावापृथिवी व्युन्धि सुप्रपाणं भवत्वघ्न्याभ्यः ॥८॥

ghṛtēnad’ dyāvāāpṛthivīv’ vyun’n’dhi sup’rapāṇam’
bhavat’vagh’nyābh’ya-ḥa ‖ 8 ‖

यत्पर्जन्य कनिक्रदत्स्तनयन्हंसि दुष्कृतः ।

yat’par’jan’ya kanik’radat’
stanayan’haṁ’si dush’kṛta-ḥa ।

प्रतीदं विश्वं मोदते यत्किं च पृथिव्यामधि ॥९॥

pratīdaṁ’ viśh’vam’m’ mōdatē
yat’kiñ’ cha pṛthiv’yāmadhi ‖ 9 ‖

अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा , उं ।

avar̥’ṣhīr’var̥’ṣhamudu ṣhū
gṛbhāyākar’dhan’vān’yat’yēētavā , u ।

अजीजन , ओषधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषाम् ॥१०॥

ajīījana , ōṣhadhīr’bhōjanāya kamutap’
prajābh’yōō (a)vidō manīṣhām ‖ 10 ‖ (1)

प॒र्जन्या᳚य॒ प्र गा᳚यत दि॒वस्पु॒त्राय॑ मी॒ळ्हुषे᳚ । स नो॒ यव॑समिच्छतु ॥ १ ॥

par’jan’yāāyap’ pra gāāyata
divas’put’rāya mīḻhuṣhēē |
sa nō yavasamit’chhatu || 1 ||

यो गर्भ॒मोष॑धीना॒ं गवा᳚ङ् कृ॒णोत्यर्व॑ताम् । प॒र्जन्य॑ः पुरु॒षीणा᳚म् ॥ २ ॥

yō gar’bhamōṣhadhīnāṅ’ gavāāṅ’ kṛṇōt’yar’vatām |
par’jan’ya[fp]’ puruṣhīṇāām || 2 ||

तस्मा॒ , इदा॒स्ये᳚ ह॒विर्जु॒होता॒ मधु॑मत्तमम् । इळा᳚न् नः सं॒यत᳚ं करत् ॥ ३ ॥

tas’mā , idās’yēē havir’juhōtā madhumat’tamam |
iḻāān’ nas’ sañ’yataṅ’ṅ’ karate || 3 || [2]

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥
ॐ śhān’tiśh’ śhān’tiśh’ śhān’tiḥi ||

www.SaiVeda.net